Gyanshauryam, International Scientific Refereed Research Journal
Available online at : www.gisrrj.com
OPEN ACCESS
© 2024 GISRRJ | Volume 7 | Issue 1 | ISSN : 2582-0095

# रामभद्रविरचितस्तोत्रकाव्येषु प्रमेयांशाः तत्र दोषविचारश्च

**कोसुलु गोविन्दराजुलु**
शोधच्छात्रः, साहित्यविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः, आ.प्र.

**Article Info**
Volume 7, Issue 1
**Page Number :** 17-21
**Publication Issue :**
January-February-2024
**Article History**
Accepted : 25 Jan 2024
Published : 15 Feb 2024

**शोधसारांशः**–रामभद्रदीक्षितमहोदयाः राघवभक्तिसाहित्यस्य देदीप्यमानाः पण्डिताः सन्ति। तैः नैकानि स्तोत्राणि रचितानि। तेषां सर्वेषामपि एकत्र संग्रहं कृत्वा रामभद्रसाहस्रमञ्जरीति ग्रन्थः प्रकाशितः। तस्मिन् ग्रन्थाः सहस्राधिकानि पद्यानि विलसन्ति । तेषु नैके प्रमेयांशाः प्रतिपादिताः। यथा – आत्मा, शरीरमित्यादयः। अत्र दोष इति प्रमेयांशः मानवस्य आन्तरिकशत्रुरूपेण दर्शनेषु उल्लिखितः। रामभद्रवर्याः तेषां दोषाणां विषये स्वस्तोत्रेषु किं लिखन्ति तदस्मिन् शोधलेखे प्रस्तूयते ।

**कूटशब्दार्थाः**–आत्मा, शरीरम्, इन्द्रियाणि, अर्थः, बुद्धिः, मनः, प्रवृत्तिः, दोषः, प्रेत्यभावः, फलम्, दुःखम्, अपवर्गः, कामः, क्रोधः, लोभः, मोहः, मदः, मात्सर्यम् इत्यादि ।

**प्रमेयशब्दार्थः** - प्र–उपसर्गात् मा–धातोः कर्मणि यत्प्रत्यते निष्पन्नः प्रमेयशब्दः। प्रकृष्टः सर्वश्रेष्ठो मेयः ज्ञेयः पदार्थः प्रमेयः। भारतीयदर्शने प्रमेयो नाम प्रमा ज्ञनविषयः पदार्थो भवति। अस्य सिद्धिः प्रमाणैः क्रियते। प्रमेयः तादृशः पदार्थः यस्य ज्ञानं भवितुमर्हति। ज्ञानस्य विषयाः नैके पदार्थाः भवन्ति । न्यायदर्शने गौतमः तान् एव पदार्थान् प्रमेयत्वेनोपस्थापयति, यैः मोक्षोऽथवा अपवर्गः लभ्यते। कोशेषु प्रमेयो नाम प्रमाज्ञानविषयः पदार्थः, परिच्छेद्यः, अवधार्य्यः इति पर्यायाः प्रोक्तास्सन्ति। वेदान्तदर्शने शुद्धचैतन्यमेव प्रमेयम्, अन्यस्याध्यासमूलकत्वेन व्यवहारिकप्रमाज्ञानविधत्वेऽपि न परमार्थप्रमेयत्वम् इत्युच्यते। न्यायदर्शने षोडश पदार्थाः उल्लिखिताः। तेषु प्रमाणादनन्तरं प्रमेयः प्रोक्तः। मुमुक्षूणां कृते प्रमेयः नितान्तम् अपेक्ष्यते। न्यायनये "आत्मशरीरे–न्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्य–भावफलदुःखापवर्गास्तु प्रमेयम्" गौतमेन प्रतिपादितम्। अत्र प्रमेयः द्वादशप्रकारकोऽस्तीति अभिहितः। यथा – (1) आत्मा (2) शरीरम् (3) इन्द्रियाणि (4) अर्थः (5) बुद्धिः (6) मनः (7) प्रवृत्तिः (8) दोषः (9) प्रेत्यभावः (10) फलम् (11) दुःखम् (12) अपवर्गश्च। वस्तुतः यः प्रमाणेन सिद्ध्यति सः प्रमेयः। महर्षिः गौतमः प्रमाणमपि प्रमेयत्वेनाङ्गीकरोति। यथा – "प्रमेया च तुला प्रामाण्यवत्"[1] इति। यदा सुवर्णादिद्रव्याणां मापनार्थं तुलायाः आवश्यकता भवति, तथैव तुलायाः गुरुत्वनिर्धारकत्वात् प्रमाणमिति स्वीक्रियते। किन्तु तुलायां यदि कस्यापि सन्देहो भवति,

[1] गौ.न्या.सू. – 2/1/16

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

तर्हि द्वितीयतुलायां वस्तु संस्थाप्य तस्य प्रामाण्यस्य परीक्षणं क्रियते। अत: तदा स: प्रमेयो भवति। एवं प्रमेयस्य साधकानि प्रत्यक्षादीनि प्रमाणानि भवन्ति, किन्तु यदि प्रामाण्यमेव सन्दिग्धं भवति तदा प्रमाणान्तरैः पुन: प्रथमप्रमाणस्य सिद्धिः क्रियते। एवं प्रथमप्रमाणं तदा प्रमेयत्वेन स्वीक्रियते । द्रव्यम्, गुण:, कर्म, सामान्यम्, विशेष:, समवाय: इत्येतेऽपि वैशेषिकदर्शने प्रमेया: भवन्ति। एवं न्याय-वैशेषिकदर्शनयो: नैके प्रमेय: प्रोक्ता:। नैयायिका: अनियत-प्रमेयवादिनो भवन्ति। सत्यपि अनन्ते प्रमेये तत्त्वसाक्षात्कारे द्वादशप्रमेया: प्रामुख्येन प्रतिपादिता:। एतेषां विषये पूर्णतया ज्ञानेन सकलपदार्था: ज्ञायन्ते। मनसि यन्मिथ्याज्ञानं भवति तस्य निवृत्तिर्जायते। मुक्ति: मोक्षो वा अधिगम्यते। अत: इमे प्रमेया: उत्कृष्टपदार्था: इत्युच्यन्ते ।

कवि: श्रीरामभद्राचारमहोदया: श्रीरामचन्द्रस्य परमभक्ता: आध्यात्मिका: भागवत-पुरुषा: स्वस्तोत्रकाव्येषु मानवस्य जीवनसाधनायै नैकान् प्रमेयान् मोक्षप्रापकान् प्रकृष्ट- पदार्थान् प्रतिपादितवन्त:।

**दोषविचार:**

**“प्रवर्त्तनालक्षणदोषा: ”** (सू.18)। न्यायदर्शने अष्टम: प्रमेय: दोष:। जीवात्मन: राग:, द्वेष:, मोह: इत्येते त्रय: दोषा: भवन्ति। एत एव प्रवृत्तिजनका: सन्ति। विषयासक्तिरूप: राग:, अन्येषामनिष्टसाधनं द्वेष:, हिते अहितबुद्धि: अहिते च हितबुद्धि: मोह: इति कथ्यते। काम-क्रोधादय: एतेषु दोषेष्वेवान्तर्भवन्ति। एतेषु सर्वेषु मोह: एव सर्वाधिक: अधर्म: इति कथ्यते।

कवि: श्रीरामभद्राचार्य: प्रवर्तनालक्षणदोषाणां विषये बहुधा स्वकाव्येषु उल्लिखति। तेषु विषयासक्तिरूप: राग: प्रमुखो भवति। विषयासक्तिरूपस्य रागस्य कारणेन कवि: दु:खं प्राप्नोति। अनेन रागरूपदोषेण स: पापकर्मणि प्रवर्तते। यथा सूर्य: मेघाच्छन्नो भवति तथैव विषयासक्ति: राग: मेघरूपेण कवे: मन: आच्छादयति । अत: स: स्वस्य मन: राघवे नियोजयति । यत: राघव: एव नराणाम् अघनाशकोऽस्ति । तदुच्यते कविना -

**चिरस्य विधुरस्य मे विषयघर्मघोरातपै:**
**पयोदनिचयोदयप्रतिनिधि: किलेयं दशा ।**
**नराघमुषि राघवे यदधुना मन: प्रीयते**
**समस्तसुरमस्तकप्रणतिकर्मणि ब्रह्मणि ।।**[2]

तत्रैव रामकर्णरसायनस्तवे कवि: मोहसारङ्गस्योल्लेखं करोति। पञ्चवट्यां सीताया: अपहरणार्थं दशानन: रावण: काञ्चनमृगं प्रेषितवान्। तं दृष्ट्वा सीताया: मनसि मोह उत्पन्न:। हिते अहितबुद्धि: अहिते च हितबुद्धि: मोह इत्युक्त:। अयं मोह: मनस: बन्धनकारणं भवति । अनेन च मानव: दु:खं प्राप्नोति। किन्तु ये योगिनो भवन्ति तेषां मनसि कदापि अयं मोहो न भवति । श्रीरामभक्तानां मुनीनां हृदये तु स्वप्नेऽपि न। कवि: लिखति -

**निगमशिखरशृङ्गान्नित्यमागत्य खेल-**
**न्मुनिजनहृदरण्ये मोहसारङ्गमुक्ते ।**
**दशवदनगजेन्द्रे दर्शिताघातलीलो**

[2] रा.क.र.स्त. - 1/15

**वशयति रघुसिंहो मानसं नः प्रसन्नः ।।**[3]

श्रीरामचन्द्रः वेदैकगम्यो भवति। ये नित्यं स्वाध्यायं कुर्वन्ति मुनयः तेषां मोहनाशाय मोहसारङ्गमुक्ते हृदयारण्ये निगमशिखरिशृङ्गात् श्रीरामचन्द्रः रघुसिंहरूपेण नित्यमागत्य दशानन-सदृशानां गजानां लीलां वशीकरोति। अत्र दशाननशब्देन दशेन्द्रियाणि ग्रहीतुं शक्यते। इन्द्रियाणि रघुपतिसेवकानां वशीभूतानि भवन्ति सुखं च लभ्यत इत्यर्थः ।

कविः पुनः कथं सांसारिकमोहग्रस्तोऽस्ति इति लिखति –

**अवासनाहीनभवसागरान्तरे**

**पतितः परेतपतितन्त्रसन्नहम् ।**

**शरणीकरोमि धरणीकुमारिका-**

**दयितं दयावलयितं दृगञ्चले ।।**[4]

अयं संसारः वासनाभिः परिपूर्णः महासागरः इति कविना उल्लिख्यते, तस्मिन्नेव सागरे अयं पतितोऽस्ति। अपि चोच्यते,

**विषयेषु विहारि निर्विशङ्कं**

**हृदयं मे हतवानलीव कीटम् ।**

**विभुरेव विदेहराजकन्या-**

**कुचकुम्भच्युतकुङ्कुमारुणाङ्गः ।।**[5]

अर्थात् यदा मानवः किमपि कार्यमकार्यञ्च न विचिन्त्य यथेच्छं कर्मणि प्रवृत्तो भवति, तदा तस्य हृदयं विषयभोगः तथा वशीकरोति यथा भ्रमरः कमपि कीटं भक्षयति। स्वयं रामचन्द्र एव विदेहराजकन्यायाः सीतायाः कुचकुम्भेन च्युतः सन् तत्कुङ्कुमेन अरुणाङ्गयुक्तः समभूत्। सर्वेऽपि मानवाः विषयभोगमोहे पतिताः स्वसत्तां नाशयन्तीति कवेरभिप्रायः अस्मात् श्लोकाज् ज्ञायते ।

अपि च कविः काम-क्रोध-लोभ-मोह-मद-मात्सर्यादीनां षड्-दोषाणामपि उल्लेखनं कृत्वा तान् सम्बोध्य वदति – हे मन्मथ ! काम ! कोप ! लोभ ! मोह ! मद ! मात्सर्य ! मां वशीकर्तुं भवतामुद्यमो वृथा भवति, यतो मम मनो रामचन्द्रं प्रभुं शरणं कुरुते । यथा –

**अयि मन्मथ ! कोप ! लोभमौहौ !**

**मद ! मात्सर्य ! वृथाऽयमुद्यमो वः ।**

**शरणं कुरुते यतो मनो मे**

---

3 रा.क.र.स्त. – 1/47

4 तत्रैव – 2/57

5 तत्रैव – 2/76

**शरकृत्ताशरनायकं प्रभुं तम् ।।**[6]

कवि: आत्मन: व्यसनेषु प्रवृत्तिं सूचयति वर्णमालास्तोत्रे। स: तद्व्यसनं त्यक्त्वा नित्यं श्रीरामचरणयो: उपविश्य सेवामेव कर्तुमिच्छति स:। अत: तेनोच्यते - हे रामचन्द्र ! भवान् दयालु: व्यसनेभ्य: मां निष्कास्य तव दासरूपेण मां स्थापय । अह्वं नित्यं तव प्रभुतामेव द्रष्टुमिच्छामि । यथा-

**क्लृप्तामपि व्यसनिनीं भवितव्यतां मे**

**नाथान्यथा कुरु तव प्रभुतां दिदृक्षो: ।**

**चक्रे शिलाऽपि तरुणी भवता तदास्तां**

**मायाऽपि यद्घटयते तव दुर्घटानि ।।**[7]

कवि: आत्मन: मोहं प्रतिपाद्य तद्विनाशार्थं श्रीरामैव एक: शरण: इति उल्लिखति । यथा-

**धत्ते शिरांसि दश य: सुकरो वधोऽस्य**

**किं न त्वया निगमगीतसहस्रमूर्ध्ना ।**

**मोहं ममामितपदं यदि देव हन्या:**

**कीर्तिस्तदा तव सहस्रपदो बहु: स्यात् ।।**[8]

कवि: विषयासक्तिदोषा: कथं कष्टदायका: भवन्ति तदुल्लिखति। तै: दोषै: सर्वमपि कृत्यजातं पङ्किलं जायते । अन्त: कश्चन परिताप: उत्पद्यते। अस्मिन् प्रसङ्गे तद्दोषनिवारणाय श्रीरामं विहाय गत्यन्तरं नास्तीति कवि: आत्मरक्षणार्थं निवेदयति । यथा -

**अत्यन्तं विषयास्तुदन्ति हृदयं सत्यं मृषा न त्विदं**

**नित्यं तेन मलीमसं भवति मे कृत्यं ततो भावि किम् ।**

**इत्यन्त: परितप्यते रघुपते गत्यन्तरं नास्ति मे**

**सत्यन्तावसरे त्वमेत्य सहसा भृत्यं तदा पाहि माम् ।।**[9]

कवि: धनमददोषमुल्लिखति। अस्मिन् संसारे नैके धनिका: वर्तन्ते। ये सर्वदा श्रीहीनान् व्यथयन्ति । यथा -

**श्रीहीनं व्यथयन्ति ये धनमदादेहीति याहीति तान्**

**बाहीकानिव न स्मराम्यपि पतीन्दोहीयसीनां गवाम् ।**

---

[6] रा.क.र.स्त. - 2/77

[7] व.मा.स्तो. - श्लो.9

[8] तत्रैव - श्लो.34

[9] रामाष्टप्रासस्तव: - श्लो.29

**देहीतीरितमन्तरेण ददते यो हीहितं देहिनां**

**पाहीति ब्रुवतो रघूद्वह दयावाही स सेव्योऽसि मे ।।**[10]

पुनः पुत्रकलत्रमित्रादिविषयेषु आसक्तिः मोहः, अहङ्कारभावना इत्यादीनामपि दोषाणाम् उल्लेखनं कृत्वा कविना उच्यते –

**नाहं पुत्रकलत्रमित्रविषयं नेहं विहातुं क्षमः**

**साहंकारमिदं मनश्च न कृतोत्साहं गुरूपासने ।**

**देहं नश्वरमन्तकस्य न दया हा हन्त तेनोज्झितुं**

**मोहं नैति रुचा विडम्बितपयोवाहं रघूणां पतिम् ।।**[11]

तृष्णादोष उच्यते कविना –

**तृष्णा यद्विषयेषु धीविकलतां पुष्णाति धैर्यं च य-**

**न्मुष्णाति श्रुतिदर्शिते पथि पदं कुष्णाति वा तन्न वा ।**

**उष्णाभीशुकुलाधिपस्य भजने वृष्णापि वन्द्यौजसो**

**निष्णातस्तु भवक्षिपाम्यघगणान्कृष्णानिवाब्दान्मरुत् ।।**[12]

अर्थात् बुद्धेः विकलतां पुष्णाति, धैर्यं मुष्णाति, श्रुतिदर्शिते पथि पदं न स्थापयितुं ददाति, अस्मिन् समये अहं केवलं सूर्यवंशस्य श्रीरामचन्द्रस्यैव भजनं कर्त्तुमिच्छामि। यतः तद्भजनेन वृष्णा अपि वन्द्यः शक्तिमांश्च जायते । अहमपि तद्भजनासक्तः निपुणस्सन् अघदोषान् तथैव दूरं क्षिपामि यथा पवनः आकाशे मेघखण्डान् दूरमपसारयति ।

एवं प्रकारेण श्रीरामभद्रः स्वकाव्ये दोषान् दर्शयति। ये दोषाः मानवमनसः बन्धनकारणानि भवन्ति । एतेषां दोषाणां दूरीकरणे एव मानवः शान्तिं लभेत, मुक्तो भवेत् इति निष्कर्षः ।

**सहायकग्रन्थसूची**

1. रामभद्रसाहस्रमञ्जरी, वी.स्वामिनाथाचार्यः, श्रीमहाप्रियावल ट्रष्ट, गुरुकृपा – 94, आइ.टि.आइ. ले आउट्, बाङ्गालोर्, 560 054
2. विशिष्टाद्वैतवेदान्त में प्रमेय मींमासा (शोधप्रबन्धः), श्याम सुन्दर तिवारी (अनुसन्धाता), संस्कृतविभाग, इलाहाबाद विश्वविद्यालय, 2054 वैक्रमीय संवत् ।
3. न्यायसूत्रम् (महामुनिगौतमकृतम्), विश्वनाथतर्कपञ्चाननकृतवृत्तिसमेतम्, पं.सुख- दयालकृतहिन्दीव्याख्यासमेतम्, पञ्जावविश्वविद्यालयः, पंजाव, 1883 ।

---

10 तत्रैव – श्लो.74

11 रामाष्टप्रासस्तवः – श्लो.60

12 तत्रैव – श्लो.77